॥ श्री गणेशाय नमः ॥

श्री गंगामहात्म्य
और
स्तुतिरत्नावली

रचयिता

स्वामी उमेश्वरानन्द तीर्थ

प्रकाशक

तीर्थ प्रकाशन

मुमुक्षुभवन-काशी

T.K.Sharma
S. S. BRIJBASI & SONS,
DELHI-6.
BAL KRISHNA
S. S. BRIJBASI & SONS,
BOMBAY.3

श्री गणेशायनमः

श्री गंगामाहात्म्य और स्तुति रत्नावली

पूर्वार्द्ध

श्री स्तुति रत्नमाला तथा श्री गंगामहात्म्यम्

उत्तरार्द्धं

श्रीकृष्ण ध्यान, जप, पूजा, हवन आदि साधना तथा श्रीराम सम्बन्धि साधनाएँ और हनुमान सम्बन्धिसाधनाएँ। परिशिष्ट सहिता।

श्री स्वामी उमेश्वरानन्द तीर्थं विरचिता (पूर्वार्द्धं) स्तुति रत्नमाला संस्कृत श्लोक मंगलाचरण सहिता, उत्तरार्द्धं में गंगामहात्म्य श्रीकृष्ण तथा राम और हनुमान सम्बन्धिसाधनाएँ तथा परिशिष्टम्।

रचयिता व संग्रह कर्ता

श्री स्वामी उमेश्वरानन्द तीर्थ

तीर्थ प्रकाशन

मुमुक्षुभवन–वाराणसी

प्राप्ति स्थान

१—श्री काशी मुमुक्षु भवन, अस्सी, वाराणसी

२—श्रीरामजानकी मन्दिर खोरिपाकड़, बलिया

प्रथम संस्करण सं० २०४२

दीपावली-१९८५

सहायता

मुद्रक

केशव मुद्रणालय

सुधाकर रोड खजुरी, वाराणसी-२

श्री गणेशायनमः

भूमिका तथा ग्रन्थ परिचय

यह छोटा-सा ग्रन्थ अमूल्य रत्न है। भगवत प्रेरणा से भक्तजनों को आनन्द प्रद तथा कल्याण कारक हो, इस दृष्टि से निर्माण किया गया है, इस छोटे से ग्रन्थ में जैसे गागर में सागर भरने का प्रयास हो, वैसे ही प्रयास किया गया है। इस ग्रन्थ में सर्वप्रथम पूर्वार्द्ध में संस्कृत भाषा में विविध देवताओं की स्तुति से मंगलाचरण किया है। इसलिए स्तुति रत्नमाला नाम रखा गया है। इसके साथ सन्तवाणी भी सुशोभित है। पुनः उत्तरार्द्ध में श्री गंगाजी की महिमा का वर्णन है उसे श्री गंगा-महात्म्य नाम रखा गया है। कलियुग में श्री गंगाजी से बढ़कर पाप नाशक, रोग नाशक, स्वास्थ वर्धक और पवित्र करने वाला दूसरा कोई साधन नहीं है। कहा भी है 'कलौगंगाविशिष्यते' श्री गंगा कलिकाल में विशेष हितकारिणी हैं। गंगाजल साक्षात् ब्रह्मद्रव है, स्नान करते समय मन्त्र बोला जाता है 'विष्णु पादाब्ज सम्भूते गंगेत्रिपथगामिनी। ब्रह्म द्रवेति विख्याते पापं मे हर जान्हवी ।। भगवान् श्रीकृष्ण द्रवित होकर जलरूप होकर संसार का कल्याण कर रहे हैं। वहीं गंगा है। गीता 'स्रोतसामस्मि जान्हवी' गंगाजी को प्रणाम करने का मन्त्र इस प्रकार है। ॐ नमोभगवत्यै, दशपापहरायै, गंगायै, नारायण्यै, रेवत्यै, शिवायै, दक्षायै, अमृतायै, विश्वरूपिण्यै, नन्दिन्यै, ते नमोनमः ।। इस प्रकार मन्त्र द्वारा गंगाजी को प्रणाम करे। गंगा दशहरा को गंगास्नान करने से दश जन्म के दश प्रकार के पाप कटते हैं। इसका भी विवेचन किया गया है। गंगाजल को अमृत कहा गया है। गंगासेवन से चतुर्वर्ग पूर्ण रूप से मिल जाते हैं, इत्यादि का वर्णन है। गंगातट में गन्दा करने से महा पाप होता है, इस कारण गंगा को प्रदूषण से बचाने का प्रयास सभी को अनिवार्य है, गंगाजी देवस्वरुपिणी है, उनको परमपवित्र भाव से ही सेवन करने से पूर्ण फल मिलेगा—आदि ।।

श्री गंगामहात्म्य नारद पुराणान्तर्गत है, वहीं यहाँ उधृत है। पुनः भगवान् श्रीकृष्ण का ध्यान, पूजन, मन्त्रजप, हवन आदि साधनायें उत्तम रूप से उधृत हैं। पुनः श्रीराम भगवान् का ध्यान, मन्त्र, जप, पूजा, हवनादि और हनुमान जी का मन्त्र, जप, हवन, पूजाध्यान आदि का सविधि वर्णन है। उपरोक्त साधनों द्वारा अनेक प्रकार के कष्टों का निवारण बन्धनों से मुक्ति आदि का सुन्दर वर्णन है। किस कार्य की सिद्धि के लिए हनुमानजी को किस प्रकार दीपदान करना चाहिये, इसका भी वर्णन है। परिशिष्ट में दीक्षा शब्द का अर्थ वर्णन और कुमारी कन्याओं का महत्व वर्णन, तथा पूजन का फल आदि का कथन और शरीर के अन्दर होने वाली क्रियाओं की अनेक जानकारियों का वर्णन है, पुनश्च-गर्गसंहिता में वर्णित गोपी-गीत का सरल, सरस संस्कृत भाषा में स्तुति लिखा है। और श्रीकृष्ण के छवि का वर्णन श्रीराधा के सौन्दर्य का वर्णन तथा यमुनाजी की स्तुति का भी अति उत्तम संग्रह है। पुनश्च अन्तिम प्रकरण में अनेक अनुभूत आयुर्वेद के औषधियों का संग्रह भी वर्णित है। इस प्रकार ग्रन्थ की समाप्ति हुई है। इसे पढ़कर पाठकगण साधना कर लाभ उठावें।

धर्म की जय हो, अधर्म का नाश हो।
प्राणियों में सद्भावना हो, विश्व का कल्याण हो।
गो माता की मय हो, गो वध बन्द हो।
॥ हर हर महादेव ॥

श्री स्वामी उमेश्वरानन्द तीर्थ जी महाराज

श्रीगणेशयनमः

सत्संग महिमा

सत्सङ्गसे—भगवत् कृपा, भगवत भक्ति, संसार से विरक्ति तथा ज्ञान, विज्ञान की प्राप्ति सुलभ होती है। श्रीकृष्ण ने कहा है—"नरोधयति मां योगो न धर्मं सांख्य उद्धव। न स्वाध्यायस्तपस्त्यागो नेष्टा पूर्तं न दक्षिणा"॥ इत्यादि-योग से, धर्मं पालन से, सांख्य से, स्वाध्याय, तप, संन्यास इत्यादि से, भी अति शीघ्र भगवत् प्राप्ति सत्संग करने से मिलता है। श्री तुलसीदास जी ने भी लिखा है—सुनिसमुझहिं जनमुदित मन, मज्जहिं अति अनुराग। लहहिं चारिफल अक्षतनु, साधुसमाज-प्रयाग॥ विनु सत्संगविवेक न होई। रामकृपा विनु सुलभ न सोई॥ सठ सुधरहि सत संगति पाई। पारस परसकुधातु सुहाई॥ इत्यादि, सत्संस की महिमा लिखी है। कथा श्रवण की महिमा भागवत् में लिखा है। "पानेनतेदेव कथा सुधायाः प्रवृद्ध भक्त्या विशदाशयाये। वैराग्य सारं प्रतिलम्यवोधं, यथाञ्जसान्वीयुरकुण्ठ-धिष्ण्यम्॥ तथापरे चात्म समाधि योग, वलेनजित्वाप्रकृति वलिष्ठां। त्वामेवधीरा पुरुषंविशान्ति, तेषां श्रमस्यान्नतु सेवयाते॥" भाव यह कि भगवान की कथा-मृत सेवन से भगवत् भक्ति प्रतिदिन बढ़ती है। बढ़ने से अन्तःकरण निर्मल होता, जिसके द्वारा वे वैराग्य सहित बोध प्राप्त कर भगवान के परम धाम को जाते हैं। ज्ञानी लोग भी आत्म समाधि योग बल से वलवती प्रकृति को जीत कर उसी परम पद को प्राप्त करते हैं। परन्तु धीर गम्भीर ज्ञानी को बहुत परिश्रम से प्राप्त होता है। आपके सेवा से सेवक भक्त, भक्ति के द्वारा अनायास ही आपको प्राप्त करता है। सत्सङ्ग लब्ध या भक्त्या। सत्सङ्ग में प्राप्त हुए भक्ति के द्वारा भगवत् प्राप्ति सहज और सुलभ है—

दान महिमा—कलियुग में दान का महत्व बहुत है। सत्य बोलनाया प्रति दिन दान देना दोनों बराबर है। अपने पास जो कुछ धन हो। उसका दसवां

भाग दान करने से धन की शुद्धि होती है। दान न करने से दोष लगता है। लिखा है जो व्यक्ति दान नहीं देता है, वह दरिद्र होता है। दरिद्र होकर पाप करता है। पाप से नरक में जाता है फिर जन्म लेकर दरिद्र होता है फिर नारकी होता है। कभी भी उसे नरक से छुटकारा नहीं मिलता है। पद्मपुराण अदत्तदानांच्चभवेद्दरिद्रो, दरिद्र, भावाच्च करोति पापम्। पाप प्रभावात् नरकं प्रयाति, पुनर्दरिद्रः पुनरेव पापी ॥ जो लोग दान धर्म करते हैं, वे परलोक में इस लोक में सुखी रहते हैं। दान का ही फल है सुख शान्ति पाप का फल है, दुःख दरिद्रता। जो लोग भगवत् अर्पण बुद्धि से निष्काम कर्म करते हैं वे भगवान की कृपा से संसार के दुःख से छूट जाते हैं। जो भगवान के अनन्य भक्त हैं, वे भगवत् धाम को प्राप्त करते हैं। यदि पूजा पाठ स्नान जप संध्या किए विना जो लोग भोजन करते हैं वे मल खाते हैं। 'अस्नात्वाश्नन् मलं भुक्ते अजप्त्वा पूय शोणितम्। अजुहाच्चकृमिम् कीटाम् अददत् च सकृत्तथा।' विना जप किए पीव और खून खाते हैं, विना हवन के कृमि कीट खाते हैं, विना दान दिए जो खाते हैं, वे विष्ठा खाते है। सूर्य को जल देकर भगवान की पूजा कर पवित्रता से भोजन बनाकर भगवत् अर्पण कर प्रसाद रूप में भोजन करे। केवल अपने उदर पूर्ति के लिए नहीं। गीता में लिखा है। 'यज्ञ शिष्टाशिनः सन्तो मुच्यन्ते सर्व किल्विषैः भुञ्जतेतेत्वघं पापा ये पचन्त्यात्म कारणात्'। पञ्च महायज्ञ करके बचे हुए अन्न को खाने वाले श्रेष्ट पुरुष सब पापों से छूट जाते हैं। जो पापी लोग अपने शरीर पोषण के लिए पकाते हैं। वे पाप ही खाते हैं। धर्म-सत्कर्म हमारा मित्र है, पाप-कर्म हमारा दुश्मन है, पुण्य परलोक तक सुख देता है। पाप नरक में डाल कर दुख देता है।

श्रीः हरिः

विषय-सूचि

क्रम सं०	कार्य विवरण	पृ० सं०

तत्सत्

विविध देवता स्तुति

ॐ परमात्मनेनमः श्रीगणेशायनमः श्रीसरस्वत्मैनमः गुरवेनमः गोविन्दायनमः व्यासायनमः नरनारायणाभ्यांनमः नमः शिवाय विष्णवेनमः नमोभगवतेवासुदेवाय दुर्गायैनमः ब्रह्मणे नमः

परमात्मनः स्तुति

यत्पादतोयं भवरोगवैद्यो, यत्पादपांशुर्विमलत्व सिद्धचै।
यन्नाम दुष्कर्मनिवारणाय, त्वमप्रमेयं पुरुषं नमामि ॥ १ ॥

श्रीगणेश स्तुति

शैलेन्द्रजादेहभवं सुमंगलं,
बुद्धिप्रदंशोक विनाशदक्षम्।
सिद्धिप्रदं ज्ञानप्रदं गजाननं,
नमामितंविघ्नहरं गणाधिपम् ॥ २ ॥

सरस्वती स्तुति

ज्ञानामृताब्धिरस सारमयीं सुनेत्रीं,
शुल्काम्बरां कनकभूषणभूषिताङ्गीम्।
वीणाञ्च पुस्तकधरांस्फटिकाख्यमालां,
वाणीं नमामि अभयां सुमुखीं पराम्बाम् ॥ ३ ॥

गोविन्दस्तुति

गोपालबालकैर्नित्यं, क्रीडन्तंयमुना तटे।
गोविन्दं सच्चिदानन्दं, नमामिसततंहरिम् ॥ ४ ॥

व्यासस्तुति

एकवेदस्यचत्त्वार शाखाकृत्वासविस्तरम्।
इतिहासपुराणानां, व्याख्यातारंनमोस्तुते ॥ ५ ॥

शिवस्तुति

मृडंधूर्जटिं सर्वदुःखाप हारिं,
शिवं शंकरं शूलपाणिंवरेण्यम्।
जगत्पूजनीयं प्रसन्नञ्च शान्तं,
नमोस्तुमहेशं सुमुक्तिप्रदंतम् ॥ ६ ॥

विष्णुस्तुति

यस्य स्मरणमात्रेण, यज्ञदानादिका क्रिया।
सद्यःसम्पूर्णतां यान्ति, तंविष्णुं प्रणमाम्यहम् ॥ ७ ॥

वासुदेवस्तुति

श्रीवासुदेवं वसुदेवपुत्रं, श्रीदेवकीनन्दनकृष्णचन्द्रम्।
श्रीरच्युतं वंशीधरं वरेण्यं, नमामितुभ्यंसुखदंसुशान्तम् ॥ ८ ॥

दुर्गास्तुति

सुशान्तिदात्रीं जननीष्टदात्रीं, सनातनी त्वां सुजनैसंपूज्याम्।
अनन्तदुःखौघविनाशदक्षां, नमामिदुर्गांजनदुःख हन्त्रीम् ॥ ९ ॥

सूर्य स्तुति

आदित्यमण्डलस्थंतं, शंखचक्रवरं प्रभुम् ।
किरीटिनं कुंडलिनं हिरण्यवपुसंभजे ॥ १० ॥

राधास्तुति

सदाषोडशवार्षिक्यां, श्रीकृष्णप्राणवल्लभाम् ।
वृषभानुसुतां राधां, नमामिसकलार्थदाम् ॥ ११ ॥

श्रीकृष्णस्तुति

अनन्तसौन्दर्यमनन्तधामं,
अनन्त आनन्द अनन्त नामम् ।
अनन्त गोपीजन सेविताङ्गं,
नमामिकृष्णं पुरुषोत्तमोत्तमम् ॥१२॥

लक्ष्मीस्तुति

स्वराज्य साम्राज्य विभूतिदायिनीं,
अनन्त आनन्द सुधा प्रदायिनीम् ।
सौभाग्य लक्ष्मीं भुवनैकपालिनीं,
नमामि नित्यं सुखदां सुशान्तिदाम् ॥१३॥

जगत्गुरुस्तुति

जगद्गुरुं जगद्वन्द्यं, जगत् पूज्यं सनातनम् ।
गोविन्दपाद शिष्यं तं शंकरं प्रणतोऽस्म्यहम् ॥ १४ ॥

गुरुवन्दना

ब्रह्माविष्णु महेशाख्यं शिष्याज्ञान विनाशकम् ।
मनोवाञ्छितदातारंतं गुरुं प्रणतोस्म्यहम् ॥ १५ ॥

गंगास्तुति

विष्णुपादोद्भवां दिव्यां त्रिलोक पावनीं शिवाम् ।
नमामि जाह्नवीं गंगा, भुक्तिमुक्ति प्रदायिनीम् ॥ १६ ॥

नारायणस्तुति

आपनार इति, प्रोक्तः तत् तस्य अयनं शुभम् ।
नारायणाख्यं तं विष्णुं, प्रणमामि निरन्तरम् ॥ १७ ॥

इन असंख्य तारों और नभ मण्डल के सिरजनहार की नजर जहाँ कहीं भी होगी वहीं रहेगी ऐसा विचार कर सदा सर्वदा सावधान रहना ।

ईश्वर के भजन पूजन में दुनियाँ की चीजों को भूल जाता है उन्हें सब चीजों में ईश्वर ही ईश्वर दिखायी देता है । (सन्तवाणी)

जो मन की मलीनता से रहित दुनियाँ के जंजाल से मुक्त और लौकिक तृष्णा से विमुख हैं वही सच्चे सन्त हैं । (सन्तवाणी)

जो मनुष्य ईश्वर में लीन रहता है और सुनने तथा देखने लायक उसी को समझा है उसने सब कुछ सुन लिया है देख लिया है और जान लिया है । (सन्तवाणी)

ईश्वर को पाने के लिये जिसका हृदय तरस रहा है उसी का जन्म धन्य उसी की माता धन्य है कारण उसका सर्वस्वतो उस ईश्वर में समाया हुआ है । (सन्तवाणी)

जो छोटे-छोटे प्राणियों से प्यार नहीं कर सकता वह ईश्वर से क्या प्यार करेगा । (सन्तवाणी)

|| श्रीगणेशायनमः ||

* श्रीगणेशस्तुतिः मङ्गलाचरणम् *

गणाधिपं तं गुण ग्रामवारिधिं, शैलेन्द्रकन्यात्मजवाञ्छितप्रदम् ।
अशेषनिर्विघ्नकरं सुमंगलं, नमामिविघ्नेश्वर पादपङ्कजम् ॥ १ ॥

गजाकृतितं गणनाथमेकं, शैलेन्द्रजायात्म समुद्भवंच ।
विद्याप्रदं बुद्धिप्रदञ्चलोकान्, विघ्नेश्वरं विघ्नहरं नमामि ॥ २ ॥

चतुर्भुजं सुन्दरमेकदन्तं, शङ्खाङ्कुशं मोदकमेक हस्तम् ।
वक्षायतं तुङ्गमहोदरं शुभं, नमामिनित्यं गणनायकं विभुम् ॥ ३ ॥

पार्वती तनयं देवं कोटि सूर्य सम प्रभाम् ।
निर्विघ्नं कुरुमेनित्यं प्रसन्नोभव सर्वदा ॥ ४ ॥

एकदन्तं वक्रतुण्डं, सर्वविघ्नविनाशकम् ।
भालचन्द्रं शान्तमूर्ति, सूपकर्णमसुशोभनम् ॥ ५ ॥

मंगलायतनं शान्तं, वाञ्छितफलदायकम् ।
कोटिसूर्य समाभासं, चन्द्रकोटि समाननम् ॥ ६ ॥

कोटिकन्दर्पलावण्यं, कोटिसद्गुणसागरम् ।
सर्वत्रानन्ददातारं, मंगलागार सर्वदा ॥ ७ ॥

सिद्धिबुद्धि समायुक्तं, क्षेमलाभसमन्वितम् ।
ज्ञानदं बुद्धिदं देवं, तं नमामि गजानम् ॥ ८ ॥

इति स्वामी उमेश्वरानन्दविरचितंगणेशाष्टकम्

•

श्रीसरस्वत्यष्टकम्

श्रीशारदाम्ब विमलाम्बरशुक्लवर्णां,
वीणाधरां सुधवलां कलहंस रूढाम् ।
ज्योतिर्मयं स्फटिकहारधरां सुकण्ठीं,
हस्तेक पुस्तकधरां प्रणमामिवाणीम् ॥ १ ॥

घोरान्धकारहृदि मे ज्वलयन् सुज्योतिं,
ज्ञानं प्रदाय सततं विपुलाञ्चनित्यम् ।
मातः प्रदातु निजभक्त जनाय मुक्तिं,
त्रायस्व मां भगवती भवताप तप्तम् ॥ २ ॥

सरस्वतीं शुक्ल सुहंसवाहिनीं,
श्वेतांम्बरां श्वेत सरोज वासिनीम् ।
श्वेतां सुदिव्यां स्फटिकाख्यमालिनीं,
सुधामयीं भारतीभास्वतीं भजे ॥ ३ ॥

आनन्ददात्रीं सुप्रकाश दात्रीं,
सौभाग्यदात्रीं जननीं सुपात्रीम् ।
सर्वेषु शास्त्रेषु सुबोधदात्रीं,
श्रीभारतीं त्वां प्रणमामिनित्यम् ॥ ४ ॥

संसार सागर समुत्तरणाय भक्त्या,
ध्यायन्तित्वां सुकवयोहृदिभावयुक्ताः ।
सम्प्राप्यज्ञान मचलं तवसुप्रसादात्,
संसारजं सकलदुःखतरन्तिपारम् ॥ ५ ॥

समुज्ज्वलां दिव्य विभूषिताम्बरां,
संसार दुःख दहनां सततं स्मरामि ।
त्वत्पादभक्त्या सुलभं सुदुर्लभं,
सर्वत्रस्वानन्द सुधांपिवाम्यहम् ।। ६ ।।

ज्ञानामृताब्धि रससारमयीं सुनेत्रीं,
शुक्लाम्बरां कनकभूषणभूषिताङ्गीम् ।
वीणां सुपुस्तकधरां स्फटिकाख्यमालां,
विद्यांनमामि सततमभयां पराम्बाम् ।। ७ ।।

सरस्वत्याष्टकं दिव्यं, भक्तिभाव समन्वितम् ।
पठनात् शारदा नित्यं, ददातिविमलामति ।। ८ ।।

श्री स्वामी उमेश्वरानन्दतीर्थं विरचितम् सरस्वत्याष्टकसंपूर्णम्

श्री सरस्वती स्तोत्रम्

श्वेताम्बरां हंस मुसेवितातां,
मृडाल पुष्पोपरि संषिशाञ्च
बीणा नदन्तीं स्वर साधयन्ती,
नमामि वाणीं जन शान्तिदात्रीम् ।।१।।

सरस्वतीं वेद विशारदां परां,
विमुक्तिदां नित्य सुधाब्धिधामदाम् ।
अलौकिकां लोकसुबुद्धिदां त्वां,
नमामि कोटीन्दु समं मुचिस्मिताम् ।।२।।

वराभय पुस्तक मालिकामयीं,
स्वरैश्चवर्णालय गान तत्पराम् ।
वेदान्त विज्ञानघनाञ्च शारदां,
नमामितां चन्द्रमुखीं समुज्ज्वलाम् ।।३।।

हारै सुंवासैश्च किरीटकुण्डले,
करद्वये वल्लकिना सुशोभिते ।
उत्तुङ्ग वक्षस्थलरत्न शोभितां,
नमामी वाणीं सकलार्थं दायिनीम् ॥४॥
ऐंकार पूर्वं च सरस्वतीञ्च,
युक्तं चतुर्थी नमः शब्द मुत्तरम् ।
कृत्वातु पञ्चायुत जापकाय,
सिद्धि प्रदात्रीं प्रणमामि वाणीम् ॥५॥
शास्त्रर्थं सारं परमार्थं सारं,
विज्ञान सारं शुभज्ञान सारम् ।
स्वरमलंकार गतं सुसारं,
तां शारदां नित्य नमामि भक्त्या ॥६॥

ॐ ह्रीं ऐं धीं क्लीं सौं श्रीं सरस्वत्यै नमः "इति मन्त्र"

ह्रींकार रूपां सुमुखीं विशुद्धां,
ऐंकार रूपां विमलां सुबोधाम् ।
धींकार रूपां हृदये विशन्तीं,
क्लींकार रूपां प्रणमामि वाणीम् ॥७॥
सौंकार रूपां सुखदां च नित्यं,
श्रींकार रूपां सकलार्थं दाञ्च ।
सरस्वतीं शान्तिप्रदां सदात्वां,
नमामि नित्यं परमार्थ तत्त्वाम् ॥८॥

शारदाष्टकमिदं पुण्यं, सर्वं शास्त्र फल प्रदम् ।
पठनात् मननात् ध्यानात्, भवति विमला मतिः ॥

इति श्री स्वामी उमेश्वरानन्दविरचितम् सरस्वती स्तोत्रम् ।

सरस्वती स्तोत्रम्

नवार्क विम्बद्युति मुग्दलत् हलत्,
 ताटंक केयूर किरीट कङ्कणम् ।
स्फुरत्क्वणन्नूपुराव रञ्जितां,
 नमामि कोटिन्दुमुखीं सरस्वतीम् ॥१॥
वन्दे सदाऽहं कलहंस उद्वते,
 चलत्पदे चञ्चल चञ्चुसम्पुटे ।
निर्धौत मुक्ता फल हार सञ्चयं,
 संधारयन्तीं सुभगां सरस्वतीम् ॥२॥
वराभयं पुस्तक वल्लकीयुतां,
 परं दधानं विमले करद्वये ।
नमाम्यहं त्वं शुभदां सरस्वतीं,
 जगन्मयीं ब्रह्ममयीं मनोहराम् ॥ ३ ॥
तरङ्गितांक्षौमसिताम्बरे परे,
 देहि स्वरज्ञानमतीव मङ्गले ।
येनाद्वितीयोहि भवेयमक्षरे,
 सर्वोपरिस्यां पर राजमण्डले ॥ ४ ॥
शुल्कां ब्रह्मविचार सार परमामाद्यां जगद् व्यापिनी,
 वीणा पुस्तक धारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्तेस्फाटिकमालिकां विदधतीं पद्मासने संस्थितां,
 वन्देतां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ ५ ॥
इति सरस्वतीस्तोत्रम् ।

श्रीदुर्गास्तवनम्

महाकाली महालक्ष्मी, महासरस्वती शिवे ।
जगदम्बे महामाये, शक्तिरूपे नमोऽस्तुते ॥ १ ॥

सुमाङ्गल्ये महेशानि, सच्चिदानन्दरूपिणे ।
सर्वदुःख हरे देवि, मातर्दुर्गेनमोऽस्तुते ॥ २ ॥

सिंहस्कन्धसमारूढे, सशस्त्रैसंमलंकृते ।
अभयं कुरू मे मात, तस्यैनित्यैनमोनमः ॥ ३ ॥

सृष्टि स्थितिलय कर्त्री, परिपूर्णाच सर्वदा ।
गौराङ्गीदैत्यदमनीं, मातर्तस्यै नमोनमः ॥ ४ ॥

भक्तानां सुखदां नित्यां, योगक्षेमकरीं सदा ।
भयान्मे त्राहित्वन्नित्यं, दुर्गेदेविनमोस्तुते ॥ ५ ॥

शरणागतदीनानां, आर्तित्राण परायणे ।
संसारभयनाशिन्यै, देव्यैतस्यै नमोनमः ॥ ६ ॥

उमासती दाक्षायणी, पार्वती त्वां वरानने ।
सर्वत्रास हरे देवि, महेशानि नमोऽस्तुते ॥ ७ ॥

सच्चिदानन्दरूपायैं, धात्र्यैशान्त्यैनमोनमः ।
अनन्तभूति पूर्णायै, देव्यैतस्यै नमोनमः ॥ ८ ॥

अनन्त कोटि ब्रह्माण्ड, नायिके परमेश्वरि ।
सन्मतिदान शिलायै, तस्यैदेव्यै नमोनमः ॥ ९ ॥

अजरामरकारिण्यै भुक्तिमुक्तिञ्चसम्पदम् ।
अनन्त धनधान्यादि, दात्र्यैंदेव्यै नमोनमः ॥ १० ॥

इति श्रीनवदुर्गास्तोत्रम् सम्पूर्णम्

स्वामी उमेश्वरानन्दतीर्थविरचितम् दुर्गास्तवनंपूर्णम् ।

श्रीसदाशिवस्तवनम्

शिवं शंकरं ध्यानगम्यं महेशं,
चलत् कुण्डलं शेषनागाङ्कितं तम् ।
जटाजूटमध्ये लसत् वारि गांगं,
ललाटेऽर्धचन्द्रं दधानं नमामि ॥ १ ॥
त्रिनेत्रं सुवक्त्रं गले मुण्डमालं,
त्रिपुण्ड्रं च भाले सुरेखाङ्किताहि ।
चतुर्दिक् प्रकाशं रविकोटिभासं,
भयं हारिणंतं, नमामि महेशम् ॥ २ ॥
जगज्जाल संहारकं तं सुवेषं,
प्रचण्डाट्टहासं प्रकुर्वन् सुनृत्यन् ।
सुढक्कां नन्दतं जटा विस्फुरन्तं,
विभुमेकशेषं महेशं नमामि ॥ ३ ॥
गले नीलवर्णं कपाले सुगंगां,
तरङ्गावली शोभितां शुक्लवर्णाम् ।
दधानैकदेवं भुवनैकबन्धुं,
नटानां सुराजांनमामि महेशम् ॥ ४ ॥
सुमुद्रादधानं समाधौ सुध्यानं,
सुधासिन्धुमध्येनिमग्नं सदात्वम् ।

सदा निर्विकल्पं चिदानन्दरूपं,
महेशं महादेव देवं नमामि ॥ ५ ॥
शिवं शंकरं शूलपाणि वरेण्यं,
मृडं धूर्जटिं सर्वदुःखापहारिम् ।
जगत् पूजनीयं प्रशान्तं प्रसन्नं,
नमोऽस्तु महेशं सुमुक्ति प्रदन्तम् ॥ ६ ॥
महेशं सुरेशं वृषेशं परेशं,
गणेशेश देवं फणीन्द्रैकमीशम् ।
गजेन्द्रस्य चर्माम्बरं शोभिताङ्गं,
भवानीपतित्वां भजेशान्तमूर्तिम् ॥ ७ ॥
शिवं शान्तिदं ज्ञानराशिं महेशं,
जटाजूटकं शैलदेशेवसन्तम् ।
फणीन्द्रैर्सदास्वाङ्गकं लाञ्छितं तं,
करे शूलढक्कां सुसेवि नमामि ॥ ८ ॥
स्वधामेवसन्तमखण्डैक रूपं,
त्रिनेत्रैकं दिव्यंसुगाम्भीर्यसिन्धुम् ।
ललाटं सुभव्यं त्रिपुण्डं पवित्रं,
प्रशान्तं समुद्रंनिधानं सुज्ञानम् ॥ ९ ॥
विभुं विश्ववन्द्यं शिवं शम्भुमेकं,
सुशान्तं सुधानन्ददं लोकपूज्यम् ।
महेशं वरेण्यं शरण्यं च लोकं,
सदा शान्तिदंतंनमामीशमीड्यम् ॥१०॥
सदात्वं सुपूज्यं प्रशान्तं स्वरूपं,
समाधौ सदात्वं सुलग्नं प्रसन्नम् ।
परामबा भवानी सुसेवा परावा,
भजन्तं सदात्वां कृतार्थाभवित्री ॥११॥

त्रिनेत्रैर्लसन्तं जटा विद्धूनन्तं,
सुनग्न शरीरेविभूतिः लसन्तम् ।
सुभालं लसन्तं चतुर्दिक् भ्रमन्तं,
प्रचण्डाट्टहासं हसन्तं वसन्तम् ॥१२॥

नमामि महेशं शिवं विश्ववन्द्यम् ॥ १२ ॥

शिवं शूलपाणीं विभुंचन्द्र मौलिं,
महादेवदेवं प्रभुंशान्त मूर्तिम् ।
प्रसन्नाननं शुभ्रवर्णं वरेण्यं,
नमामि महेशं सदा शान्त मूर्तिम् ॥१३॥

गिरीशं महेशं विभुमम्बिकेशं,
गणेशैकमीशं शिवं कार्तिकेशम् ।
वृषस्यैकमीशं अहीन्द्रैकमीशं,
महेशं सुपूज्यं नमामि सदात्वम् ॥१४॥

शशीखण्डमौलिः शशीभासभालं,
शशीकोटि वक्त्रं शशीकाशदेहम् ।
स्वयं गौरदेहं सुगौरीश शम्भुं,
सुगौरंवृषंतं सुरूढं नमामि ॥१५॥

गले नीलीमाभं शिवं शुक्लवर्णं,
सदात्वामुदासीन वृतिप्रियोऽसि ।
विभूतिं सदात्वं निजाङ्गे दधासि,
परिधानमेकं सुव्याघ्राम्बरञ्च ॥१६॥

सदानिर्विकल्पो समाधिस्थदेहो,
सुमाङ्गल्यध्यानं सुमुद्रादधासि ।
सदाज्ञानराशि सदानन्दराशि,
नमामि महेशं सदा काशीवासीम् ॥१७॥

विश्वेश्वरो माधव ढुण्ढि राजः,
काशीगुहां जाह्नवीभैरवश्च ।
सदण्डपाणि मणिकर्णिकायै,
बन्दे सदाशंकरमबिकाञ्च ॥१८॥

इति स्वा० उ० श्व० नन्दविचरितं इति शिवस्तोत्रम् ।

श्री विश्वनाथाष्टकम् स्तोत्रम्

विश्वेश्वराय भवरोग विनाशकाय,
गंगातरङ्ग धवली कूलवासकायं ।
ज्योतिर्मय.य शिवलिङ्ग प्रकाशकाय,
काशीश्वराय सततं प्रणमामि तुभ्यम् ॥१॥
विश्वं प्रकाश सततं सकलं प्रदाय,
मोक्षैक धाम कृत दान सदा जनाय ।
आनन्द सिन्धु विलयाय सुविग्रहाय,
विश्वेश्वराय सततं प्रणमामि तुभ्यम् ॥२॥
वाराणसीपुरी निरन्तर सेविताय,
गंगाधराय शशीखण्ड शुशोभिताय ।
व्यालाधिराज निजमौलिसुवेष्ठिताय,
विश्वेश्वराय सततं प्रणमामि तुभ्यम् ॥३॥
श्री काशिकायां स्थित दिव्यलिङ्गं,
प्रकाशते लोक हिताय नित्यम् ।
श्री विश्वनाथस्तवनाम व्यापकं,
भूताधिवासं प्रणमामि नित्यम् ॥४॥

नन्द्यादि भृङ्ग्यादि गणैसुसेवितं,
देवादिमन्वादि जनैः सुपूजितम् ।
आनन्दकन्दं परमंसुमंगलं,
श्री विश्वनाथं प्रणमामिनित्यम् ।।५।।

कैवल्यनिर्माण सुशन्तिधामदं,
ऐश्वर्यमानन्द सुधाप्रदंप्रभुम् ।
श्री शंकरं सर्वजनैः सुवन्दितं,
श्री विश्वनाथं प्रणमामि नित्यम् ।।६।।

नाना विलासैः परिपूरितोऽपि,
सदाउदासीन सदाविरागी ।
त्वयैवदत्तं सकलं सुसम्पदं,
भुञ्जन्ति लोका प्रणमामि तुभ्यम् ।।७।।

महास्मशानेनिवसत् सदाशिवः,
जीवस्यस्थूलादि त्रयंशरीरम् ।
करोति भस्मं स्वप्रदत्तज्ञानात्,
नमामिशम्भोतवपादयुग्मम् ।।८।।

इत्याष्टकं शंकर नाम शोभितं,
येयेपठन्तीह सदादिनेदिने ।
श्री शंभुभक्ति हृदयेभविष्यति,
श्री विश्वनाथस्य सुदर्शनञ्च ।।९।।

श्री स्वामी उमेश्वरानन्द तीर्थ विरचितं शिवाष्टकम्

जो परमेश्वर को पाता है वह अपने रूप में न रहकर प्रभु के रूप में समा जाता है । 'सन्तवाणी'

ईश्वर का स्मरण करो तो ऐसा कि फिर दूसरी बार उसे याद ही न करना पड़े । 'सन्तवाणी'

काशी स्तुति

धन्यासिकाशी शिवधन्यकाशी, गायन्तिमर्त्या सुखदाऽसि काशी।
तवैव क्रोड़े वसतोहि जीवाः, कालात् सुभीता नभवन्ति काशी ॥१॥

धन्यासि काशी सुखशान्ति राशी, घोरान्धकारे घनज्योति राशी।
जीवान् स्वज्ञानेनप्रकाशदाऽसि, धन्याऽसि काशी शिववासदाऽसि ॥२॥

काश्यां मरण मात्रेण, जीवानां श्री सदाशिवः।
ददाति तारकं मन्त्रं, तेन जीवोविमुच्यते ॥३॥

मरणासन्न जीवानां, दक्षिणे कर्णगोलके।
ददाति विमलं ज्ञानं, निर्वाण पददायकम् ॥४॥

अस्मिन्क्षेत्रे मृताजीवा, मुक्ताएव न संशयः।
इतिशास्त्र प्रमाणानि, प्रवदन्तिमनीषिणः ॥५॥

जटा विशाला नयना विशालाः, फणीन्द्रमाला परमा विशाला।
अगाधगाम्भीर्यं विमुक्तिशालां, कालस्य कालं प्रणमामि शम्भुम् ॥६॥

इति काशीषटकम्

ज्योतिर्लिङ्गम्

दिव्यलिङ्गं ज्योतियुक्तं सुपूज्यं, शान्ति दान्ति सद्गतिदान शीलम्।
ये ये लोके सज्जनापूजयन्ति, ते ते सर्वेमोक्षभागी भवन्ति ॥१॥

अम्वान्नपूर्णास्तुतिपञ्चकम्

अम्वान्नपूर्णे जगदम्बिके शिवे, दुर्गेभवानो शिवप्राण वल्लभे।
अनाथनाथेनिजभृत्यवत्सले, मांपाहि नित्यं पतितं त्वदाश्रये ।।१।।

हे दुर्गहन्त्रीजनदुःखनाशिनी, मामुद्धराशु चरणौ प्रदाय हि।
भुक्तिञ्चमुक्तिञ्चददातुनः शिवे, पादाब्जरेणुं शिरसिनिधेहिवः ।। २ ।।

शिवस्य वामाङ्गमलंकृताङ्गी, त्वमन्नपूर्णा शुभदायिनीञ्च ।
शम्भो सदा प्राणसमप्रियात्वं, मनन्यभावां प्रणमामि नित्यम् ।। ३ ।।

मातान्नपूर्णे जनमन्नदात्रीं, सुरासुरैसर्वजनैः सुपूजिताम् ।
भिक्षान्नदत्त्वा त्रिजगत् सुपालिनीं, अम्बान्नपूर्णे प्रणमामिनित्यम् ।। ४ ।।

शिवस्य त्वं नित्य सुसेविकाऽसि, सदाशिवः सर्वजनायमुक्तिः ।
ददाति शाश्वत् मरणेन काश्यां, जीवान्त्वमन्नं प्रददासिनित्यम् ।। ५ ।।
अम्बान्नपूर्णे प्रणमामिनित्यम् ।। इति उमेश्वरानन्दरचितम् अन्नपूर्णा स्तोत्रम् ।

जो मनुष्य ईश्वर को छोड़कर दूसरों से स्नेह करता है वह क्या कभी सुखी हो सकता है ।
'सन्तवाणी'

विना ईश्वर का नाम लिए कोई भी बात विचारने अथवा करने से बड़ी विपत्ति का सामना करना पड़ता है ।
'सन्तवाणी'

जो आदमी अपना सारा संसार और अपने जीवन को भगवत् अर्पण नहीं करता वह दुनियाँ के इस भयानक जंगल को पारकर ही नहीं सकता ।

श्रीरामस्तुति रामचन्द्राष्टकम्

रामं श्यामं राजीवनेत्रं रमणीयं,
सीताकान्तंशान्तंनित्यं सुखकन्दम् ।
शोभादिव्यं मरकतवर्णं नृपतीशं,
वन्दे रामं नवनलिनाभमवधेशम् ॥ १ ॥

नानाद्रव्यैर्पूजितनित्यं शिवपूज्यं,
नानाशास्त्रैर्वन्दितनित्यं सुखकन्दम् ।
नानाभोगैर्शोभितनित्यं समसेव्यं,
वन्देरामं धरणीजायासम सेव्यम् ॥ २ ॥

रामं नित्यं सायक चापं करधारिं,
शोभा पुञ्जं रत्नकीरीटं शिरसेव्यम् ।
रामंराज्ये राजविराजं नृपश्रेष्ठं,
वन्दे रामंश्यामलकायं सुखपुञ्जम् ॥ ३ ॥

दण्डकविपिने त्राणविहीन प्रचलन्तं,
लक्ष्मण सीतासहचरनीतं विचरन्तम् ।
ना ना वृन्दै ऋषिजन सहितैर्भजनीयं,
वन्दे रामं निर्गत कामं सुखधामम् ॥ ४ ॥

रावण शत्रुं वानरमित्रप्रतिपालं,
दनुजविनाशिजनसुखराशि सुखधामम् ।
अनुज सहगमनं सीतासहरमणं,
मारुतसुतसेव्यं नाशकजन व्यसनं प्रणमामि ॥ ५ ॥

शान्तं दान्तं शोकविहीनं सकलत्रं,
मुनिजनपालक भवभय नाशक ।

सुमधुर धरणीतल अवतार धरं,
श्रीरामं दशरथ तनयं प्रणमामि ॥ ६ ॥
रामं नित्यं वाञ्छित फलदं प्रणमामि,
रामं नित्यं लक्ष्मण पूज्यं नृपश्रेष्टम् ।
मायातीतं कालातीतं त्रिगुणेशं,
निर्गुणमेकं शान्तं शुद्धं प्रणमामि ॥ ७ ॥
श्यामलकायं निर्मितमायं प्रणमामि,
जाप्यंनित्यं तवशुभ नामं सुखपूर्णम् ।
वन्दे रामं श्यामलकायं धरणीशं,
वन्दे रामं शतदलनेत्रं सततंत्वम् ॥ ८ ॥
साष्टाङ्ग प्रणाम-रामं नमामि मनसा वचसा च नित्यं,
रामं नमामि शिरशा उरसातथैव ।
रामं नमामिपदजानुभुजौदृशाच,
रामं नमामि सततं भुवनेशमीड्यम् ॥ ९ ॥

इति रामाष्टकम् स्वामी उमेश्वरानन्दरचितं सम्पूर्णम् ।

अपने सब काम भूलकर सदा ईश्वर को स्मरण करते रहो। 'सन्त वाणी'

सच्चा सन्त ईश्वर की गोद में खेलता मुस्कराता सुन्दर बालक है।
'सन्तवाणी'

अपनी प्रिय से प्रिय वस्तु का अपने प्रिय परमात्मा के लिए त्याग करो यही प्रभु प्रेम का लक्षण है। 'सन्तवाणी'

भक्त जब प्रभु का सब प्रकार से आश्रय लेता है तभी परमेश्वर उसकी रक्षा अपने हाथ में ले लेता है। 'सन्तवाणी'

अङ्काधिरूढं शिशुगोपगूढम्, स्तनं धयन्तं कमलैक कान्तम् ।
सम्बोधयामास मुदायशोदा, गोविन्द दामोदर माधवेति ॥
(स्तोत्र से०)

श्रीकृष्ण स्तुति

बंशीवादनमेव यस्य सुरूचिगोचारणं तत्परं,
वृन्दारण्यविहारणार्थं गमनं गोवंश सङ्घावृतम् ।
नानावृक्ष लतादिगुल्मषु शुभं लीलाविलाशं कृतं,
तं वन्दे यदुनन्दनं प्रतिदिनं भक्तान् सुशान्तिप्रदम् ॥१॥

एकस्मिन् समये सुचारू मुरलीं, संवादयन्तं जनान्,
स्वानन्दैकरसेन पूर्णजगतिं वंशीरवंपाययन् ।
सुस्वादुसुधया तरंग सकललोकेषु विस्तारयन्,
तं वन्दे यदुनन्दनं प्रतिदिनं स्वानन्द शान्ति प्रदम् ॥२॥

वर्हापीड सुशोभितञ्च शिरसि नृत्यंकरं सुन्दरं,
ॐ कारैकसमान रूपमधुरं वक्षस्थलेमालिकाम् ।
रूपं श्यामधरं हिरण्यपरिधिं धत्तेकरेकंकणं,
तं वन्दे यदुनन्दनं प्रतिदिनं विज्ञानदंज्ञानदम् ॥३॥

या वंशी शिवरूपकञ्च सुमुखे संयोज्य फुत्कारयन्,
ब्रह्मा यष्टि स्वरूपकं करतले शोभाकरं सुन्दरम् ।
इन्द्रोऽपि शुभरूपश्रृङ्गमभवत् श्रीकृष्णसेवारतः,
वेदस्य सुऋचाऽपि धेनु-अभवन् देव्यस्तु गोपीजनाः ।
तं वन्दे यदुनन्दनं प्रतिदिनं आनन्ददानेरतम् ॥४॥

कालीयदमनं सुचारू गमनं लीलाविलासं सदा,
नृत्यन्तमतिसुन्दरं रूचिकरं वर्हावतंशंधरम् ।
पश्यन्तंरुचिरं सुहासमधुरं भालंऽलकैर्शोभितं,
तं कृष्णं प्रणमामि नित्यमनिशं निर्वाण शान्तिप्रदम् ॥५॥

श्यामं कान्तियुतं सुकोमल तनुं नृत्यं शिवं सुन्दरं,
नाना रत्नधरं सुवक्षसि सदा कट्यां शुभां शृंखलाम् ।
पीतं वस्त्रधरं नितम्बविमले तं श्यामलं कोमलं,
वन्देऽहं सततं हि नन्दतनयं श्रीवालकृष्णंम् हरिम् ॥६॥
राधा माधव रासगोष्ठि विपुलं कृत्वा च वृन्दावने,
नाना गोपशिमन्तिनी सखिजनाः नृत्यन्ति रासोत्सुकाः ।
नाना छन्द रसाऽनुभूतिमधुरंगायन्ति स्वानन्ददम्,
तं वन्दे यदुनन्दनं प्रतिदिनं भृत्यान् सदाशान्तिदम् ॥७॥
समाकर्षयन्तं कृपावर्षयन्तं, भवभीतलोकं सुशान्ति प्रदंतम् ।
सदानन्द सिन्धौ निमग्नं रमन्तं, समास्वासयन्तं भवाभीतलोकम् ।
सदाबोधयन्तं सुधादानशीलं, नमामि सदा त्वां कृपासिन्धुदेवम् ॥८॥

श्री स्वामी उमेश्वरानन्द विरचितं श्री कृष्णस्तुति सम्पूर्णम्

श्रीकृष्ण स्तुति—"श्रीकृष्ण शरणंमम"

त्रिभङ्गललितः कृष्णः, परमेश परात्परः ।
मयूरपिच्छमुकुटगुडा,केशाच्युतव्ययः ॥ १ ॥
मणिमाणिक्यमाल्यादि, हारभूषणभूषितः ।
पीताम्बरोनटवरः , घनश्यामलविग्रहः ॥ २ ॥
श्रीधरः सच्चिदानन्दः, सर्वानन्द फलप्रदः ।
जगत्पति जगत्कर्ता, जगल्लयसतत्परः ॥ ३ ॥
सुपूर्णं परमानन्दः, नन्दनन्दन बालकः ।
लीला नरवपुहरिः, लीलाकैवल्यविग्रहः ॥ ४ ॥
धरणीधरः सर्वज्ञः, ईश्वरः परमेश्वरः ।
भूभार हारक सर्वः, सिन्धु मध्ये निवासकः ॥ ५ ॥

अनन्तगोपकन्यानां, रासलीला कर प्रभुः ।
अन्तर्यामि सर्वविच्च, कैवल्य मुक्ति दायकः ॥ ६ ॥

आदि मध्यावसानेषु, नित्य शुद्धः सनातनः ।
श्रीकृष्णमखिलाधारं, भक्तवाञ्छाफलप्रदम् ॥ ७ ॥

नमामितमहं नित्यं, भुक्तिमुक्ति फलप्रदम् ।
अनन्त शीलशोभाढ्यं, श्यामलं गरूडध्वजम् ॥ ८ ॥

नमामि तमहं भक्त्या, सदानन्दैक रूपिणम् ।
मधुरं मधुरं नादं, वंशीवादन कारकम् ।
कृपादृष्टया सुधावृष्टया, पूरयन्तं नमाम्यहम् ॥ ९ ॥

श्री स्वामी उमेश्वरानन्द विरचितं श्री कृष्णस्तोत्रम् सम्पूर्णम्

श्रीकृष्णस्तोत्राणि

दिव्यातिदिव्यं परमङ्गसुन्दरं, श्यामाङ्ग शोभा सुविकाशमुज्ज्वलम् ।
केयूरवान् कुण्डलवान् किरीटिवान्, पीताम्बरं वंशीधरं हरिं भजे ॥ १ ॥

चन्द्राननं शोभितमम्बुजेक्षणं, श्रीवत्सवक्षस्थल मालिकादिभिः ।
विभूषितं मेखलयाङ्गुलीयकैर्वृन्दावने वंशीधरं हरिं भजे ॥ २ ॥

आनन्ददं शान्तिप्रदं सुविग्रहं, आनन्दकन्दं सरसिरुहेक्षणम् ।
सुमंगलं वाञ्छितदं सनातनं, नमामि कृष्णं परमं सुदुर्लभम् ॥ ३ ॥

मध्ये निकुंज मध्येवनकान्ति शोभितं, गोपाङ्गनानां परमं सुसौख्यदम् ।
समाह्वयन्तं निकेटस्थिताञ्जनान्, सदा प्रसन्नं प्रणमामितंहरिम् ॥ ४ ॥

मधुरं मधुरं नादं, वंशीवादन कारकम् ।
समाह्वयन्तं गोपीनां, तं नमामिकृपानिधिम् ॥ ५ ॥

निकुञ्जमध्येगुप्तं च, राधया सह संयुतम् ।
रमणीयं सुरपतिं कृष्णं वन्दे दयानिधिम् ॥ ६ ॥

गोपीनां सुमुखीनाञ्च, रासहास समागमः।
परमानन्द दातारं, नमामि श्रीहरिंपरम् ॥ ७ ॥

सुमुखेमुरलीधृत्वा, वादयन् पूरयन रसान्।
त्र्यैलोक्यानन्ददंदेवं कृष्णं वन्दे सताङ्गतिम् ॥ ८ ॥

समाकर्षयन्तं सुधावर्षयन्तं, समास्वादयन्तमनुरागिणीनाम्।
सदानन्दकारिं सुमालीं मुरारीं, सदालम्बयेहं तवैव सकाशम् ॥ ९ ॥

श्रीकृष्णकृष्णभगवन् मम दीनबन्धो,
त्र्यैलोक्यरक्षक विमोकरूणानिधानः।
संसारभीतिदहन सुखरूपधारिन्,
वन्दे सदैव चरणौ तव शान्तिदायकै ॥ १० ॥

श्रीकृष्णकृष्णेतिक्षरद्वयं प्रियं, शान्तिप्रदं नाम सुमङ्गलञ्चते।
वाक्गद्गदंचित्तद्रवं च येषां, तेयान्ति सद्यंभवसिन्धु पारम् ॥ ११ ॥

श्रीकृष्ण नामं परमं सुदुर्लभं, ये ये जपान्तीह सदैवमर्त्याः।
तेधन्यभाग्यासुकृताकृतार्थाः, तरन्तिपारम्भवसागरस्य ॥ १२ ॥

श्रीकृष्णस्तोत्रम्

श्रीकृष्णचन्द्र पुरुषोत्तम केशवाय,
राधावराय वरवारिजलोचनाय।
गोपाङ्गनाजन सुशोभित विग्रहाय,
कृष्णायव्योमशदृशायनमामिनित्यम् ॥ १ ॥

तस्मै परस्मै पुरुषाय साक्षिणे, स्वभृत्य संसार विपद्विनाशिने।
अदीन लीलाकर दुःखहारिणे, नमामिसर्वान्त गुहान्तरात्मने ॥ २ ॥

शिखिपिच्छ मौलीमुकुटे सुशोभिते,
हस्ते सुदिव्यमुरली सुखदासवाते।
वृन्दावने चलसिगुल्मलतादि मध्ये,
पङ्कुचांनुपूरक्वणयन् रमणायते नमः ॥ ३ ॥

गोवर्धनाद्रि निकटे वनकुञ्ज मध्ये,
गो गोपवाल परिवेष्ठित नन्दबालम् ।
एकेन हस्त कमलेन गृहीतयष्टि,
मन्ये करेण धृतवेणु रसादि पूर्णम् ॥ ४ ॥

तं गोपवंश सुखदं वसुदेव सुनूं,
वन्दे सदैव भवपाश विनाशदक्षम् ।
आनन्दमात्रमचलं परिपूर्णकामं,
कामादि शत्रुदमनाय सदैव तत्परम् ।
संसार सागर समुत्तरणावलम्बनं,
कृष्णं नमामि सततं भवरोगभेषजम् । ५ ॥

श्रीराधिकाया शुभहृत्सरोजे, मूर्त्यङ्कितं तेहृदयेऽपिराधा ।
परस्पर प्रेमरसाश्रयाभ्यां, नमोनमःश्रीहरिराधिकाभ्याम् ॥ ६ ॥

गोपीजनः सुहृदिमन्दिर वासकारी,
गोवर्द्धनाद्रिघरसर्वभयापहारिः ।
शक्रस्यगर्वशिखरस्य विनाशकारीः,
मोहान्धकार मनसिवसतां मुरारिः ॥ ७ ॥

हे कृष्णहेयदुपतेभुवनैक वन्धो,
हे माधव मृदुपदेकरूणैकसिन्धो ।
हे सच्चिदात्मसुख रूपसुधैकसिन्धो,
मां पाहि पाहि भगवन् प्रणमामिनित्यम् ॥८॥

कलाषोडषपूर्णाय सौन्दर्यस्य महार्णवे ।
ऐश्वर्यादिसमग्राय, कृष्णचन्द्रायते नमः ॥ ९ ॥

श्रीस्वामी उमेश्वरानन्दतीर्थं विरचितं श्रीकृष्णाष्टकम् सम्पूर्णम् ।

श्रीकृष्णाष्टकंस्तोत्रम्

नमोस्तु कृष्णाय सहाग्रजाय, देव्यै च तस्यै वृषभानु जायै।
नमोस्तुवृष्ण्यन्धक सात्वतेभ्यः, नमोनमस्ते यदुवंशजेभ्यः॥ १॥
श्रीसच्चिदानन्द सुश्यामलाय, राधादिगोपीजन सेविताय।
वृन्दावनेरासविहारकाय, नमोनमस्तेयदुनन्दनाय॥ २॥
श्रीकृष्णमूर्तिघनश्यामल शोभिताय,
दिव्याय प्रेमरससार सुशान्तिदाय।
आनन्द सागर सुशोभित मुक्तिदाय,
कृष्णाय शक्तिसहिताय नमामिनित्यम्॥३॥
आनन्द सिन्धु निजधाम निवासकाय,
स्वलोकवासीजन शान्ति सदाप्रदाय।
गोलोकमेव सततं समलंकृताय,
कृष्णायशक्तिसहिताय नमामिनित्यम्॥४॥
किरीटिनं कुण्डलिनं वनमालाविभूषितम्।
निर्भयमुद्रया युक्तं, करकंज सुशोभितम्॥ ५॥
प्रसन्नवदनदेवं कृष्णं वन्दे जगद्गुरुम्॥
श्रीवासुदेवंवसुदेवपुत्रं, श्रीदेवकीनन्दन कृष्णचन्द्रम्।
श्रीरच्यूतं वंशीधरं मुरारिं, मां रक्षकं त्वां प्रणमामि नित्यम्॥ ६॥
बर्हावतंवधर सुन्दरबालरूपं, बिम्बाधरं सुमधुरं शिशुगोपवेषम्।
आनन्दकन्द मुरलीधर श्यामलं त्वां, वृन्दावनालयमहं प्रणमामिनित्यम्॥७॥
आनन्दमात्रञ्च सदैव निर्मलं, पापं विनाशाय सततपरं च तम्।
स्वभक्तत्राणाय सदा सुलग्नकं, नमामि कृष्णं सततं सुपूज्यम्॥ ८॥
इति श्रीस्वामी उमेश्वरानन्दतीर्थं विरचितं श्रीकृष्णाष्टकम् स्तोत्रम्।

श्रीकृष्ण लीला विंशतिकास्तोत्रम्

अरूप भूतोपि सुरूप धारिणे, भूभार संसार सुचारू कारिणे ।
भक्तान् सदानन्द रस प्रदायिने, नमोस्तु कृष्णाय सुवाल रूपिणे ॥ १ ॥

भूम्यां यदाभारविवर्धते महान्, भूदेवि दुःखेन प्रपीडिताऽसीत् ।
रूरोद धातुः निकटेव गत्वा, मां पाहि देवेश जगन्निवास ॥ २ ॥

तां रूदतीं दीनमतीत दुखितां, दृष्ट्वा च वेधा गतवान् पयोनिधिम् ।
तत्रातिदिव्यं पुरुषस्य सूक्तं, जपन् परम्ब्रह्म हरिं समीडितः ॥ ३ ॥

तदासुसूक्ष्मं गगनेरितं वचो, श्रुत्वाऽथवेधातमवर्णयच्च ।
श्रुतंमया ब्रह्ममयीं सुवाणीं, दुःखस्य नाशं भवतेव शीघ्रम् ॥ ४ ॥

ईशेन पूर्वं कृतवान्नुपायं, कृष्णावतारोहि ब्रजे भविष्यति ।
गृह्णान्तु जन्मान् ब्रजवासीनां गृहे, तत्रैव कृष्णस्य सुदर्शनं भवेत् ॥ ५ ॥

अजस्य वाक्यं श्रवणेन देवा, अति प्रसन्ना अगमन् व्रजं ते ।
देवाहि सर्वे व्रजवासीनोजनाः, जानिहि राजन् इति निश्चयंमे ॥ ६ ॥

तदैव सर्वे व्रजवासीनां गृहे, देवादि गोपाल सुवालकाऽभवन् ।
तेषां तु देवी व्रजगोपिका भवन्, ता तत्र कृष्णस्य-अनन्य दासिकाः ॥ ७ ॥

स्वभक्तवृन्दाय प्रमोदनार्थं, साक्षात् परब्रह्म सुजात गोकुले ।
तदावभूवातिसुमंगलामही, साक्षात् हि वैकुण्ठ समाधरित्री ॥ ८ ॥

सानन्द सर्वं व्रजमण्डलेऽभूत्, कंसस्य संताप सदाहि भूतले ।
जन्मर्क्षे योगे वसुदेव देवकी, समाश्रयित्वा भगवान् सुजायतः ॥ ९ ॥

सायोगमायाऽपि सदापरायणाः, कृष्णाय नेतुं कृतवान्नुपायम् ।
नीत्वाथतां गोकुलनन्दपत्न्यां, निधाय कृष्णं हि सुयोग माया ॥
नीतं गता कंसपुरे रुरोद ॥१०॥

दूतेन संदेश श्रुतेतु कंसः, भयात् अधावच्च विमुक्त केशः।
स्खन् पतन् वा गतवान् स्व स्वन्तिके, तां वालिकां योगमयीं सुमायाम् ॥१०॥

हस्तौ गृहीत्वा कृतवान् प्रताडनं,
सा तस्य हस्तात् समगाद्दिवाम्बरे।

जगाद कंसाय श्रृणुस्व दुर्मतेः,
पुरैव जातः तव मृत्यु बालकः ॥ ११ ॥

हिंसात्यजमाकुरु पाप दुष्टः, सादिव्यदेहाष्टभुजाभवानी।
गतासु विन्ध्याचलवासिनीऽभूत् ॥ १२ ॥

श्रीकृष्ण जन्मोत्सवनन्दगोकुले, वभूव सर्वत्र समस्त मण्डले।
तत्रैव गोपीजनगोपशंकुले, हर्षातिरेकेण सुगाम चक्रिरे ॥ १३ ॥

श्रीदेवकी पालित गर्भमध्ये, यशोदया लालित वाल्येक्रोडे।
श्रीराधिकाऽऽलिङ्गित यौवनेऽपि, गोपाङ्गनानां रमयञ्चकार ॥ १४ ॥

श्रीकृष्ण चन्द्रेण सुपालिते व्रजे, गावश्च गोपाश्च सदा प्रसन्नाः।
सुखं सदा स्वानुभवं विकुर्वन्, कृष्णं सदावाञ्छितदं प्रपन्नाः ॥ १५ ॥

कारागृहे जन्म व्रजे च वासः, गोचारणं याति करोति रासः।
कंसाय लोके महतः सुत्रासः, तथाऽपि कृष्णकुरुते सुहासः ॥ १६ ॥

दैत्यान् सदा हि प्रकरोति नाशः, भक्ताय सानन्द करोति वासः।
कालं विनाशाय प्रचण्ड हासः, वाञ्छामि मांदेहि स्वभक्तिदास्यः ॥ १७ ॥

माधुर्य राशीरसदः सदाऽसि, गोपीश विश्वेश व्रजेश कृष्णः।
जपामि नित्यं प्रणमामि नित्यं, मामुद्धराऽऽशु सततं नमामि ॥ १८ ॥

हे कृष्ण मामुद्धरदीनवन्धो ! भवाग्नितापेन सुदारूणेन।
लग्नोस्मि नित्यं शरणं विदेहि, नमामि नित्यं भवभुक्ति हेतुम् ॥ १९ ॥

वंशी वादन शीलाय कृष्णामपरमात्मने।
वृषभानु सुतास्कन्धे न्यस्त हस्तायते नमः ॥ २० ॥

स्वामी उमेश्वरानन्द तीर्थं विरचितं लीलाविंशतिकास्तोत्रम् सम्पूर्णम् !

बाल कृष्णाष्टकम्

तं वालमद्भुतंरूपमम्बुजाक्षं चतुर्भुजम् ।
किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥ १ ॥

शंख चक्र गदा पद्म, धारिणं दिव्यविग्रहम् ।
श्रीवत्सांकितवक्षञ्च गले कौस्तुमशोभितं ॥ २ ॥

श्यामाङ्गे पीतवस्त्रं च, शोभितम् वपुषंहरिम् ।
गोपालवालकानां हि सहक्रीडाकर विभुम् ॥ ३ ॥

गोपीनां कोमलाङ्गीनां क्रोडेषु समलं कृतम् ।
अत्यन्तं कोमलाङ्गञ्च विम्वोष्ठं तं हरिं भजे ॥ ४ ॥

कालिन्दी पुलिनेरम्ये क्रीडन्तं वालकः सह ।
आनन्दकन्दरूपं तं वालकृष्णमहं भजे ॥ ५ ॥

वीणाधारीनारदस्य दृष्टचाग्रेणपलायितम् ।
यशोदाऽङ्केरूरुक्षतं वालकृष्णमहं भजे ॥ ६ ॥

एकदा दधिचौराय यशोदोक्तं च किंकृतम् ।
सोऽवदत् कंकणदाह शान्तंकुर्मेतिमातरम् ॥ ७ ॥

क्रीडासक्ताय कृष्णाय माताआह्वयति यदा ।
नायाति वत्सः किं तुभ्यं ताडनाकरणीयमे ॥ ८ ॥

भयात् शीघ्रं समायाति पुनरालिङ्गच चुम्वितम् ।
वाललीला करं देवं तं वन्दे कृष्ण दुर्लभम् ॥ ९ ॥

इति वालकृष्णाष्टकम् ।

दामोदराष्टकम्

दामोदराय कृष्णाय करे वंशीधराय च ।
उदरे दामवद्धाय वालकृष्णाय ते नमः ॥ १ ॥

उलूखलेन सम्वद्ध उदरेऽपि च वन्धनम् ।
मुक्तिदाता स्वयं वद्ध अन्यान् लोकान् विमुक्तये ॥ २ ॥

यमलार्जुनयोत्पाटच नलकूवर मुक्तये।
मणिग्रीवाय मोक्षञ्च ददंतं तं नमाम्यहम् ॥ ३ ॥

रिङ्गयञ्च समागच्छन्नंगणे यशोदाग्रतः।
पालायन परं देवं दामोदरं नमाम्यहम् ॥ ४ ॥

उलूखलोपर्य्यारुह्य नवनीतञ्चभुञ्जयन्।
मर्कटान्नपि दत्तं तं वालकृष्णं नमाम्यहम् ॥ ५ ॥

दधिभाण्डं खण्डयित्वा पलायित्वा गतोऽन्यतः।
नवनीतंचौरकं तं दामोदरं नमाम्यहम् ॥ ६ ॥

दामोदरेति नामस्तु लोकान् मुक्ति प्रदायकम्।
तेन तं संस्मरेन्नित्यं भवबन्ध विमुक्तये ॥ ७ ॥

यशोदा यष्टिकां धृत्त्वा भीषयन्ती भयापहम्।
भयभीताय कृष्णाय दामोदरायते नमः ॥ ८ ॥

दामोदराष्टकं नित्यं ये पठन्ति नरा भुवि।
ते भववन्ध निर्मुक्ता यान्ति तं परमं पदम् ॥ ९ ॥

श्री स्वामी उमेश्वरानन्दतीर्थं विरचितं वालकृष्णाष्टकम्

भगवतः श्रीकृष्णस्य परिकरपरिचयविशंतिका स्तोत्रम्

दण्डके रामचन्द्रं हि, दृष्ट्वामुनिगणाश्चये।
मुग्धासन्तस्यसंस्पर्शं, कर्तुमिच्छन् सतत्पराः ॥ १ ॥

तान्नाह भगवान् सर्वान्, कृष्णरूपे भविष्यति।
परमानन्दरूपोहि, नन्दगोप इति स्मृतः ॥ २ ॥

श्रीकृष्णं पुत्ररूपेण, प्राप्य नन्दो सुनन्दितः।
मुक्तिदात्री यशोदात्री, ब्रह्मविद्याऽपि सापरा ॥ ३ ॥

नन्दस्य पत्निरूपेण, यशोदाऽभूत् व्रजेश्वरी।
(यो नन्दो परमानन्द यशोदा मुक्ति गेहिनी) श्रुति
ब्रह्मजा प्रणवा विद्या देवकी चेति विश्रुता ॥ ४ ॥

समष्टि निगमोवेदः वसुदेवश्च जायतः।
सर्वेवेदास्तुवन्ति यं नित्यमेव समादरात् ॥ ५ ॥

स एव भगवान् कृष्णः समुत्तीर्णं महीतले।
दिव्यगोपाङ्गनाभिश्च क्रीडन्तं स चचारह ॥ ६ ॥

नाना श्रुतिगणा सर्वे वनवासी मुनीश्वराः।
गावो गोप्यश्चते सर्वे, संजाताधरणी तले ॥ ७ ॥

गोकुलं वन वैकुण्ठं द्रुमासन्ति तपस्विनः।
उपासनाकाण्डरूपा श्रुतिद्वचेष्ट सहस्र का ॥ ८ ॥

सताधिक्यः ततोऽष्टौ च ऋचोपनिषदस्यह।
दया तु रोहिणी देवी सत्यभामाधराऽभवत् ॥ ९ ॥

सुदामा समता जातः सत्यऽक्रूरो बभूवह।
दमश्चोद्धव संजातः भुतलेति च सुश्रुमः ॥ १० ॥

शंखस्तु सोदरोलक्ष्या, लक्ष्मीरूपो न संशयः।
विष्णु रूपश्च तं प्राहुः, सिन्धौ घोष करोति सः ॥ ११ ॥

गोपीनां गृहमध्येतु, दधिभाण्डानि विखण्डिताः।
तौ जातौदधि सिन्धु क्षीरसिन्धुश्च कथ्यते ॥ १२ ॥

ईशनिर्मित लोकस्तु, चक्ररूपेण भ्राम्यते।
ईशोत्पन्नस्य लोकस्य, प्राणवायु सुचर्मकम् ॥ १३ ॥

अग्नितुल्यः महेशोहि, खड्गरूपेण वर्तते।
कश्यपोलूखलंभुत्वा, भगवन्तमवापह ॥ १४ ॥

अदिति देव माता तु, रज्जु रूपेण वर्तते।
सर्वशत्रु निहन्त्री सा, गदा काली बभूवह ॥ १५ ॥

माया शार्ङ्गधनुश्चैव, ईशहस्ते बभूवह।
मायाऽविद्या ऋतुकाल, तस्य देवस्य भोजनम् ॥ १६ ॥

ईशहस्ते जीव संघं, कमलमपि शोभितम् ।
गोपालो कृष्णरूपश्च, साक्षात् माया वपुंधरः ॥ १७ ॥

सुदुर्बोधं कुहकन्ते, मायया मोहितं जगत् ।
गरुडोवटभाण्डिर, सुदामा नारदोऽभवत् ॥ १८ ॥

वृन्दा भक्ति क्रिया बुद्धि, तस्यदेवस्य जायते ।
अघासुरस्तुपापोऽभूत्, क्रोधलोभादि राक्षसाः ॥ १९ ॥

मत्सर मुष्टिकश्चैव, द्वेषचाणूर एव च ।
दर्पकुवलयापीड, वकगर्वोनसंशयः ॥
कलिकंसोऽभवत् तत्र, अघस्तु व्याधिरेव च ॥ २० ॥

श्रीस्वामी उमेश्वरानन्द विरचितं लीला परिचय विशंतिका सम्पूर्णम्

जिन लोगों को इन तीन वस्तुओं पर प्रेम है उनमें और नरक में ज्यादा दूरी नहीं है । (१) स्वादिष्ट भोजन (२) सुन्दर वस्त्र (३) धनवानों का सहवास ।

—'सन्त वाणी'

जो मनुष्य ईश्वर पर विश्वास रखकर उसी की प्रीति के लिए धर्माचरण करता है वही निर्मय है उसे ही प्रभु अपनी सेवा में लेते हैं ।

सदा विनय और प्रेम पूर्वक ईश्वर का भजन करो, सेवा और सम्मान पूर्वक साधुजनों का सत्संग करो ।

साधुजनों के लिए भी सत्संग आवश्यक है जो सत्संग से दूर रहता है वह रोग रहित नहीं है ।

इन चार वातों से जीव का कल्याण होता है ईश्वर के प्रति दीनता, ईश्वर से भिन्न पदार्थों से निस्पृहता ईश्वर का ध्यान और विनय ।

एक प्रभु का सदैव स्मरण रखो मनुष्यों की बात रहने दो ।

मनुष्य से तो जितनी कम हो सके बात करो, ज्यादा बात करो उस ईश्वर से ।

श्रीराधाकृष्ण विवाह द्वादशाऽश्लोकी

एकदानन्द गोपस्तु, कृष्णं नीत्त्वा वनं ययौ ।
झंझावातमभूत् तत्र, तेन दुखेन पीडितः ॥ १ ॥
तस्मिन् कालेतु एकाकी, यूवति षोडष्यागता ।
साऽऽहतं तत्र पुत्रस्य, रक्षाकर्तुमिहागता ॥ २ ॥
देहिमांत्वं गृहं गच्छ, नीत्वाहन्ते व्रजेश्वरीम् ।
प्रदास्यामि न सन्देहः, तव पुत्रं सुवालकम् ॥ ३ ॥
तां दत्त्वानन्दगोपस्तु, निवर्त्य स्वगृहं ययौ ।
तदा सा राधिका देवि, स्वस्थानं काननं ययौ ॥ ४ ॥
तत्राद्‌भूतमभूत् शीघ्रं, दिव्यसिंहासनं महत् ।
मणिमाणिक्य रचितं, पूर्णशोभामयं शुभम् ॥ - ॥
आरुह्य राधयायुक्तो, कृष्णः षोडष वार्षिकः ।
सुशोभितौ च द्वौभूत्त्वा, तत्र क्रीडा सुतत्परौ ॥ ६ ॥
तस्मिन् कालेतु ब्रह्माऽपि, सर्वंज्ञात्त्वा समागतः ।
वरवध्वो सुमाङ्गल्यं कार्यंकर्तुं समारभत् ॥ ७ ॥
विवाहं विधिवत् कृत्त्वा, पुनर्ब्रह्मा स्वयं ययौ ।
तत्रानन्देन सम्पन्नौ, भूत्त्वापूर्ण स्वलकृतौ ॥ ८ ॥
परस्पर रमन्तौ च, बहुकाल मगात् यदा ।
रमणानन्तरे कृष्ण, राधा स्वाङ्के पुनः स्थितः ॥ ९ ॥
तदा श्रीकृष्णः वालोऽभूत्, राधा तु षोडषीशुभा ।
भूय सा राधिका कृष्णं, नीत्त्वागत्त्वा व्रजंप्रति ॥ १० ॥
नन्दपत्नीं ददात् शीघ्र, कथयन् व्यसनञ्चताम् ।
पुनराधा गता तत्र, वसतिस्म सदापुरा ॥ ११ ॥
तदन्ते नन्दगोपस्तु गृहं गत्त्वा ददर्शह ।
रहस्यं गोपनीयं हि, आसीत् सर्वञ्चमायया ॥ १२ ॥
श्रीस्वामी उमेश्वरानन्दतीर्थ विरचितं श्रीकृष्णविवाहद्वादशी सम्पूर्णम्

षोडषाक्षर मन्त्रजपमहात्म्यस्तोत्रम्

नारदंप्रति ब्रह्मोवाच श्रृणुनारदः तत्परः।

हरे कृष्ण हरे कृष्ण, कृष्ण कृष्ण हरे हरे-

हरे राम हरे राम राम राम हरे हरे।

इति षोडषकं नामः कलिकल्मष नाशकम्।
नातः परतरोपायं, सर्ववेदेषु दृश्यते ॥ १ ॥

षोडषःकलयायुक्तो, जीवस्त्वावरणं त्यजन्।
तदा प्राकाशते ब्रह्म, मेघापाये यथारविः ॥ २ ॥

पुनः प्रपच्छ देवर्षि, किं विधि जपतो जनैः।
ब्रह्माहह्यस्य मन्त्रस्य, विधिर्नास्त्येव नारदः ॥ ३ ॥

अपवित्रः पवित्रो वा सर्वदा जापकोनरः।
सालोक्यञ्च शारुप्यञ्च, सामीप्यञ्चसायुज्यता ॥ ४ ॥

चतुर्विधार्गात प्राप्य, सच्चिदानन्द संयुतः।
पितृदेवमनुष्याणां, अपकारात् विमुच्यते ॥ ५ ॥

ब्रह्महत्यादि पापानि, तरत्येव न संशयः।
स्वर्णस्तेयात् धर्मत्यागात्, सर्वदोषात् विमुच्यते ॥ ६ ॥

वेदान्तवाक्यै कलिकल्मषघ्नं, अत्यन्तगुप्तं मतमुधृतञ्च।
तेधन्यभाग्या सततं स्मरन्ति, तरन्ति पारं भवसागरस्य ॥ ७ ॥

हरेति कृष्णेति हरेति कृष्णः, कृष्णेति कृष्णेति हरे हरेति।
हरेति रामेति हरेति रामः, रामेति रामेति हरे हरेति ॥ ८ ॥

इदं परं दुर्लभ नामकीर्तनं, कलौयुगे ये पुरुषाजपन्ति।
गायंन्ति नित्यं हृदिभावयुक्ता, श्रीकृष्णसायुज्यगतिलभन्ते ॥ ९ ॥

कोटीत्रयसार्द्धं जपन्तियेते, शुध्यन्ति पापात् कलिकल्मषाच्च।
साक्षात् प्रकुर्वन्ति परात्मतत्त्वं, संयान्ति दिव्यं परमात्मनः पदम् ॥ १० ॥

इदं सुपुण्यम् कलिकल्मषघ्नं, मन्त्रञ्च दिव्यं पुरुषा दिने दिने।
जपन्ति गायन्ती इह मर्त्यलोके, संयन्ति तं ब्रह्ममयं सु धामम् ॥ ११ ॥

येन केन प्रकारेण, जपमात्रेण सिध्यति।
जपन्तं सततं नामं, जीवन्मुक्तो भवेन्नर ॥ १२ ॥

श्री स्वामी उमेश्वरानन्दतीर्थ विरचितं षोडषाक्षर मन्त्र·जप
महात्म्यं सम्पूर्णम्।

"श्रीराम जय राम जय जय राम" मन्त्र महात्म्यम्

श्री पूर्वं जय पूर्वञ्च तद्विधं राम नामकम्।
त्रयो दशाक्षरो मन्त्रो, मुनि ब्रह्मा विराट् स्मृतः ॥ १ ॥

छन्दस्तु देवता प्रोक्तो राम पापौघ नाशनः ॥

नारद पुराण पू० ३ पा० ७६८७

श्रीराम नामा मृतमन्त्र बीज, संजीवनी चेन् मनसि प्रविष्टा।
हाला हलं वा प्रलयानलं वा, मृत्यों मुखे वा विशतां कुतोभी ॥ २ ॥
श्री शब्द पूर्वं जय शब्द मध्यं, जय द्वये नापि पुनः प्रयुक्तम्।
त्रिसप्त कृत्वा रघुनाथ नामः, जपन्नि हन्यान् द्विजकोटि हत्या ॥ ३ ॥

—आ० रामायण

श्री पूर्वकं राम जयश्च रामः, जयद्वयश्चापि पुनश्च रामः।
त्रिसप्त संख्या कृत रामनाम, जपात् विहन्यात् द्विजकोटि हत्याः ॥ ४ ॥

अस्य मन्त्रस्य सिद्धिस्तु, कोटी त्रयोदशं जपात्।
भवत्येव न सन्देहः प्रवदन्तिमनीषिणः ॥ ५ ॥

—स्व० उमेश्वरानन्द

इति स्तुति रत्नमाला समाप्तम्।
इति पूर्वार्द्धः समाप्तम्।

अथ उत्तरार्द्ध

गंगा स्नान की विधि तथा महात्म्य

आवाहनमन्त्र

विष्णुपाद प्रसूतासि, वैष्णवी विष्णुदेवता ।
त्राहि नस्त्वेन सस्मादावाजन्म मरणान्तिकात् ॥ १ ॥

तिस्त्रकोटयोर्ध कोटी च तीर्थानां वायुरब्रवीत् ।
दिविभूम्यन्तरिक्षेयातनानि ते सन्ति जाह्नवी ॥ २ ॥

नन्दिनी त्येव ते नाम, देवेषु नलिनीति च ।
दक्षापृथिवी च विहगा, विश्वकाय स्मृता शिवा ॥ ३ ॥

विद्याधरी सुप्रसन्ना, तथा विश्व प्रसादिनी ।
क्षमा च जाह्नवी चैव, शांता शांतिप्रदायिनी ॥ ४ ॥

एतानि पुण्यनामानि, स्नानकाले प्रकीर्तयेत् ।
